# ॥ वाल्मीकि रामायण॥

## ७ उत्तरकाण्ड

## अध्याय २५

स तु दत्त्वा दशग्रीवो वनं घोरं खरस्य तत् ।
भगिनीं च समाश्वास्य हृष्टः स्वस्थतरोऽभवत् ॥१॥

ततो निकुम्भिला नाम लङ्कायाः काननं महत् ।
महात्मा राक्षसेन्द्रस्तत्प्रविवेश सहानुगः ॥२॥

तत्र यूपशताकीर्णं सौम्यचैत्योपशोभितम् ।
ददर्श विष्ठितं यज्ञं सम्प्रदीप्तमिव श्रिया ॥३॥

ततः कृष्णाजिनधरं कमण्डलुशिखाध्वजम् ।
ददर्श स्वसुतं तत्र मेघनादमरिन्दमम् ॥४॥

रक्षःपतिः समासाद्य समाश्लिष्य च बाहुभिः ।
अब्रवीत्किमिदं वत्स वर्तते तद्ब्रवीहि मे ॥५॥

उशना त्वब्रवीत्तत्र गुरुर्यज्ञसमृद्धये ।
रावणं राक्षसश्रेष्ठं द्विजश्रेष्ठो महातपाः ॥६॥

अहमाख्यामि ते राजञ्श्रूयतां सर्वमेव च ।
यज्ञास्ते सप्त पुत्रेण प्राप्ताः सुबहुविस्तराः ॥७॥

अग्निष्टोमोऽश्वमेधश्च यज्ञो बहुसुवर्णकः ।
राजसूयस्तथा यज्ञो गोमेधो वैष्णवस्तथा ॥८॥

माहेश्वरे प्रवृत्ते तु यज्ञे पुम्भिः सुदुर्लभे ।
वरांस्ते लब्धवान्पुत्रः साक्षात्पशु पतेरिह ॥९॥

कामगं स्यन्दनं दिव्यमन्तरिक्षचरं ध्रुवम् ।
मायां च तामसीं नाम यया सम्पद्यते तमः ॥१०॥

एतया किल सङ्ग्रामे मायया राषसेश्वर ।
प्रयुद्धस्य गतिः शक्या न हि ज्ञातुं सुरासुरैः ॥११॥

अक्षयाविषुधी बाणैश्चापं चापि सुदुर्जयम् ।
अस्त्रं च बलवत्सौम्य शत्रुविध्वंसनं रणे ॥१२॥

एतान्सर्वान्वराँल्लब्ध्वा पुत्रस्तेऽयं दशानन ।
अद्य यज्ञसमाप्तौ च त्वत्प्रतीक्षः स्थितो अहम् ॥१३॥

ततोऽब्रवीद्दशग्रीवो न शोभनमिदं कृतम् ।
पूजिताः शत्रवो यस्माद्द्रव्यैरिन्द्रपुरोगमाः ॥१४॥

एहीदानीं कृतं यद्धि तदकर्तुं न शक्यते ।
आगच्छ सौम्य गच्छामः स्वमेव भवनं प्रति ॥१५॥

ततो गत्वा दशग्रीवः सपुत्रः सविभीषणः ।
स्त्रियोऽवतारयामास सर्वास्ता बाष्पविक्लवाः ॥१६॥

लक्षिण्यो रत्नबूताश्च देवदानवरक्षसाम् ।
नानाभूषणसम्पन्ना ज्वलन्त्यः स्वेन तेजसा ॥१७॥

विभीषणस्तु ता नारीर्दृष्ट्वा शोकसमाकुलाः ।
तस्य तां च मतिं ज्ञात्वा धर्मात्मा वाक्यमब्रवीत् ॥१८॥

ईदृशैस्तैः समाचारैर्यशोऽर्थकुलनाशनैः ।
धरणं प्राणिनां दत्त्वा स्वमतेन विचेष्टसे ॥१९॥

ज्ञातीन्वै धर्षयित्वेमास्त्वयानीता वराङ्गनाः ।
त्वामतिक्रम्य मधुना राजन्कुम्भीनसी हृता ॥२०॥

रावणस्त्वब्रवीद्वाक्यं नावगच्छामि किं त्विदम् ।
को वायं यस्त्वयाख्यातो मधुरित्येव नामतः ॥२१॥

विभीषणस्तु सङ्क्रुद्धो भ्रातरं वाक्यमब्रवीत् ।
श्रूयतामस्य पापस्य कर्मणः फलमागतम् ॥२२॥

मातामहस्य योऽस्माकं ज्येष्ठो भ्राता सुमालिनः ।
माल्यवानिति विख्यातो वृद्धप्राज्ञो निशाचरः ॥२३॥

पितुर्ज्येष्ठो जनन्याश्च अस्माकं त्वार्यकोऽभवत् ।
तस्य कुम्भीनसी नाम दुहितुर्दुहिताभवत् ॥२४॥

मातृष्वसुरथास्माकं सा कन्या चानलोद्भवा ।
भवत्यस्माकमेषा वै भ्रातॄणां धर्मतः स्वसा ॥२५॥

सा हृता मधुना राजन्राक्षसेन बलीयसा ।

यज्ञप्रवृत्ते पुत्रे ते मयि चान्तर्जलोषिते ॥ २६॥

निहत्य राक्षसश्रेष्ठानमात्यांस्तव संमतान् ।
धर्षयित्वा हृतराजन्गुप्ता ह्यन्तःपुरे तव ॥ २७॥

श्रुत्वा त्वेतन्महाराज क्षान्तमेव हतो न सः ।
यस्मादवश्यं दातव्या कन्या भर्त्रे हि दातृभिः ।
अस्मिन्नेवाभिसम्प्राप्तं लोके विदितमस्तु ते ॥ २८॥

ततोऽब्रवीद्दशग्रीवः क्रुद्धः संरक्तलोचनः ।
कल्प्यतां मे रथः शीघ्रं शूराः सज्जीभवन्तु च ॥ २९॥

भ्राता मे कुम्भकर्णश्च ये च मुख्या निशाचराः ।
वाहनान्यधिरोहन्तु नानाप्रहरणायुधाः ॥ ३०॥

अद्य तं समरे हत्वा मधुं रावणनिर्भयम् ।
इन्द्रलोकं गमिष्यामि युद्धकाङ्क्षी सुहृद्वृतः ॥ ३१॥

ततो विजित्य त्रिदिवं वशे स्थाप्य पुरन्दरम् ।
निर्वृतो विहरिष्यामि त्रैलोक्यैश्वर्यशोभितः ॥ ३२॥

अक्षौहिणीसहस्राणि चत्वार्युग्राणि रक्षसाम् ।
नानाप्रहरणान्याशु निर्ययुर्युद्धकाङ्क्षिणाम् ॥ ३३॥

इन्द्रजित्त्वग्रतः सैन्यं सैनिकान्परिगृह्य च ।
रावणो मध्यतः शूरः कुम्भकर्णश्च पृष्ठतः ॥ ३४॥

विभीषणस्तु धर्मात्मा लङ्कायां धर्ममाचरत् ।
ते तु सर्वे महाभागा ययुर्मधुपुरं प्रति ॥ ३५॥

रथैर्नागैः खरैरुष्ट्रैर्हयैर्दीप्तैर्महोरगैः ।
राक्षसाः प्रययुः सर्वे कृत्वाकाशं निरन्तरम् ॥ ३६॥

दैत्यांश्च शतशस्तत्र कृतवैराः सुरैः सह ।
रावणं प्रेक्ष्य गच्छन्तमन्वगच्छन्त पृष्ठतः ॥ ३७॥

स तु गत्वा मधुपुरं प्रविश्य च दशाननः ।
न ददर्श मधुं तत्र भगिनीं तत्र दृष्टवान् ॥ ३८॥

सा प्रह्वा प्राञ्जलिर्भूत्वा शिरसा पादयोर्गता ।
तस्य राक्षसराजस्य त्रस्ता कुम्भीनसी स्वसा ॥ ३९॥

तां समुत्थापयामास न भेतव्यमिति ब्रुवन् ।
रावणो राक्षसश्रेष्ठः किं चापि करवाणि ते ॥ ४०॥

साब्रवीद्यदि मे राजन्प्रसन्नस्त्वं महाबल ।
भर्तारं न ममेहाद्य हन्तुमर्हसि मानद ॥ ४१॥

सत्यवाग्भव राजेन्द्र मामवेक्षस्व याचतीम् ।
त्वया ह्युक्तं महाबाहो न भेतव्यमिति स्वयम् ॥ ४२॥

रावणस्त्वब्रवीद्धृष्टः स्वसारं तत्र संस्थितम् ।
क्व चासौ तव भर्ता वै मम शीघ्रं निवेद्यताम् ॥ ४३॥

सह तेन गमिष्यामि सुरलोकं जयाय वै ।
तव कारुण्यसौहार्दान्निवृत्तोऽस्मि मधोर्वधात् ॥ ४४॥

इत्युक्त्वा सा प्रसुप्तं तं समुत्थाप्य निशाचरम् ।
अब्रवीत्सम्प्रहृष्टेव राक्षसी सुविपश्चितम् ॥ ४५॥

एष प्राप्तो दशग्रीवो मम भ्राता निशाचरः ।
सुरलोकजयाकाङ्क्षी साहाय्ये त्वां वृणोति च ॥ ४६॥

तदस्य त्वं सहायार्थं सबन्धुर्गच्छ राक्षस ।
स्निग्धस्य भजमानस्य युक्तमर्थाय कल्पितुम् ॥ ४७॥

तस्यास्तद्वचनं श्रुत्वा तथेत्याह मधुर्वचः ।
ददर्श राक्षसश्रेष्ठं यथान्यायमुपेत्य सः ॥ ४८॥

पूजयामास धर्मेण रावणं राक्षसाधिपम् ।
प्राप्तपूजो दशग्रीवो मधुवेश्मनि वीर्यवान् ।
तत्र चैकां निशामुष्य गमनायोपचक्रमे ॥ ४९॥

ततः कैलासमासाद्य शैलं वैश्रवणालयम् ।
राक्षसेन्द्रो महेन्द्राभः सेनामुपनिवेशयत् ॥ ५०॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com